# केन्द्रीयसंस्कृतविश्वविद्यालयः

## मुक्तस्वाध्यायपीठम्

## शैक्षिकविकासकेन्द्रम् श्रृङ्गेरी

## मुक्तस्वाध्यायपीठस्य विकासपरिचिन्तनकार्यशालायाः उद्घाटनकार्यक्रमस्य नूतनसत्रारम्भकार्यक्रमस्य च प्रतिवेदनम् ।

12-12-2023 तः 15-12-2023 पर्यन्तम् केन्द्रीयसंस्कृतविश्वविद्यलयस्य राजीवगान्धीपरिसरे श्रृङ्गेर्यां मुक्तस्वाध्यायपीठस्य विकासपरिचिन्तनकार्यशाला आयोजिता । केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतेः आचार्यस्य श्रीनिवासवरखेडीवर्यस्य आध्यक्ष्ये अस्याः कार्यशालायाः उद्घाटनसत्रं 12-12-2023 दिनाङ्के पूर्वाह्णे सम्पन्नम् ।

अस्मिन् कार्यक्रमे मुख्यातिथिरूपेण डा. मनोजकुमारनागसम्पिगे महोदयः (निदेशकः, आन्तर्जालिकशिक्षा-निदेशनालयः, मणिपाल-उच्चशिक्षण-अकादमी) समागतः । श्रीमान् अरुणः श्रीगणेशश्च इत्येताभयां कृतेन वैदिकमङ्गलाचरणेन, देवाङ्गभट्टेन प्रस्तुतेन लौकिकमङ्गलाचरणेन च समारब्धे कार्यक्रमे मुक्तस्वाध्यायपीठस्य निदेशकः आचार्यः रत्नमोहनझाः स्वागतं प्रास्ताविकं च वचः अवदत् । मुक्तस्वाध्यायपीठस्य गतिविधीनां परिचयं कार्यशालायाः प्रसङ्गिकतां च न्यरूपयत् । कुलपतिवर्यः शैक्षिकविकासकेन्द्रस्य औपचारिकम् उद्घाटनम् कृत्वा मुक्तस्वाध्यायपीठस्य शैक्षिकविकासकेन्द्रस्य कर्तव्यानि, भावियोजनाः च अधिकृत्य उदबोधयत् । संस्कृतं शास्त्राणि च विश्वस्य नाना कोणेषु प्रापयितुं विश्वविद्यालयेन क्रियमाणप्रयासानपि न्यरूपयत् । वैश्विकस्तरे मुक्तदूरस्थशिक्षणप्रणाल्याः वर्धमानां जनप्रियताम् उपलक्ष्य संस्कृतशिक्षणम् उन्नेतुम् एषा प्रणाली उपादेया भवतीति मुख्यातिथिरूपेण समाहूतः

डा. मनोजकुमारनागसम्पिगेमहोदयः प्राबोधयत् । परिसरनिदेशकः आचार्यः हंसधरझामहोदयः शास्त्राणाम् अध्ययने आन्तर्जालिककक्ष्याणां प्रासङ्गिकताम् अधिकृत्य स्वाभिप्रायं प्राकटयत् । सन्दर्भेऽस्मिन् तन्त्रज्ञैः अनिलकुमार-गोपालकृषणप्रभृतिभिः परिष्कृतस्य स्वाध्यायप्रबन्धनतन्त्रांशस्य परिवर्धितसंस्करणस्य, दार्शनिकैः अध्यापकैः राहुल-सिद्धार्थ-मानवेन्द्र-अनन्तकृष्णैः सज्जीकृतायाः दर्शनपरिचयस्वाध्यायसामग्र्याः, भाषाध्यापकेन किरणभट्टेन सज्जीकृतायाः नैतिकशिक्षणस्वाध्यायसामग्र्याः, वास्तुशास्त्राध्यापकेन मुरलीकृष्णेन सज्जीकृतायाः मनुष्यालयचन्द्रिकासम्बद्धस्वाध्ययसामग्र्याः, अध्यापकैः जगदीशभट्ट-मुरलीकृष्णप्रभृतिभिः सङ्कलितायाः स्वाध्यायपीठवार्तासञ्चिकायाः, कविभ्यां देवाङ्गभट्ट-उमामहेश्वराभ्यां प्रशिक्षितैः छात्रैः विरचितकवितानां सङ्ग्रहरूपस्य नवोदितकविताप्रसूनानि इति ग्रन्थस्य च लोकार्पणं कुलपतिप्रमुखैः विद्वद्भिः कृतम् । गतसत्रे प्राक्तनसत्रीयछात्राणां स्वाध्यायप्रोत्साहनाय तन्त्रांशमाध्यमेन आयोजित-सङ्गोष्यादिक्रियाकलापान् अधिकृत्य अध्यापकाभ्याम् अनन्तकृष्ण-किरणभट्टाभ्यां प्रतिवेदनं प्रस्तुतम् ।

कार्यक्रमेऽस्मिन् मणिपालतः समागता पत्रकारिताविशेषज्ञा डा. कविता महाभागा, रा.गा.परिसरस्य मूर्धन्याः आचार्याः सि.एस्.एस्. नरसिंहमूर्ति-चन्द्रकान्त-सूर्यनारायणभट्टप्रभृतयः, मुक्तस्वाध्यायपीठस्य शैक्षिकविकासकेन्द्रस्य सर्वे प्राध्यापकाः च उपस्थिताः आसन् । शान्तिमन्त्रेण उद्घाटनकार्यक्रमः सम्पन्नः । संयुक्तनिदेशकः कृ. वेङ्कटेशमूर्तिमहोदयः कार्यक्रमस्य सञ्चालनम् अकरोत् ।

उद्घटनसत्रस्य अनन्तरं प्रथमे द्वितीये च सत्रे उद्बोधकः डा मनोजकुमारनागसम्पिगेवर्यः दूरस्थशिक्षाप्रणाल्याः स्वरूपं, तस्य प्रासङ्गिकता, महत्वं, चतुरायात्मिका स्वाध्यायवेदी, स्वाध्यायसमाग्रीणां गुणदेषाः इत्यादिविषयेषु उदबोधयत् । तदनन्तरम् सम्बद्धविषयेषु परिचर्चा अपि पृवृत्ता ।

तदनन्तरं 2023-24तमे सत्रे प्रविष्टानां नूतनानां छात्राणां सत्रारम्भकार्यक्रमः प्रवृत्तः। मुख्यातिथिरूपेण समागता अम्बेड्कर विश्वविद्यालयस्य प्रो अमी यू उपाध्याया छात्रान् उद्दिश्य संस्कृतस्य शास्त्राणां च अद्ययनस्य सान्दर्भिके काले प्रासङ्गिकतां निरूपयत् । कुलपतयः आध्यक्षवचोभिः संस्कृतस्य वैश्विकतां संस्कृताध्ययनस्य महत्वं च प्रवोधयन् । कार्यक्रमः यूट्यूब् माद्यमेन प्रसारितः । तत्र पञ्चसहस्राधिकाः छात्राः लाभान्विताः अभवन् ।

**शैक्षिकविकासकेन्द्रस्य केन्द्रस्य सन्दर्शनम् –**

कुलपतयः, मुख्यातिथयः च मुक्तस्वाध्यायपीठस्य शैक्षिकविकासकेन्द्रस्य विकास-व्यवस्थादिपरिशीलनं कृतवन्तः । प्रत्येकं विभागस्य सन्दर्शनेन सह पुस्तकालयस्य पुस्तकप्रेशणयन्त्रस्य च परिशीलनम् अकुर्वन् । शैक्षिकविकासकेन्द्रस्य सदस्याः अस्य यन्त्रस्य प्रात्यक्षिकीं प्रददुः । सन्दर्भेस्मिन् निदेशकप्रभृतिशैक्षिकविकासकेन्द्रस्य सर्वे सदद्याः उपस्थिताः आसन् ।

कार्यशालायाः द्वितीये दिने आचार्यः रत्नमोहनझाः तथा संयुक्तनिदेशकः आचार्यः कू.वेङ्कटेशमूर्तिः च मुक्तस्वाध्यायपीठस्य विकासार्थं भाविनिकार्याणां परिचयं प्रददुः । नूतनसत्रस्य समयसारिणीनिर्धारणं, LMS सम्बद्धतया अग्रिमपरिष्कारः, छात्राणां सौकर्यं मनसि निधाय स्वीक्रियमाणाः नैके शैक्षिककार्यक्रमाः, पुस्तकप्रेषणसम्बद्धत्या आवश्यकसूचनाः च प्रददुः । एतत्सम्बद्धतया परिचर्चा अपि कृता ।

कार्यशालायाः तृतीये दिने मुक्तस्वाध्यायपीठस्य विकासस्य विशेषचिन्तनं कृतम् । आचार्यः रत्नमिहनझाः, संयुक्तनिदेशकः आचार्यः कू.वेङ्कटेशमूर्तिवर्यः च शिक्षिकविकासकेन्द्रे कार्यरतैः प्राध्यापकैः सह मेलनं कृत्वा कृतकार्याणां परामर्शम् अकुर्वन् । भाविसूचनाः च प्रादायि । तदनु मुक्तस्वाध्यायपीठस्य विकासपरिचिन्तनकार्यशालायाः समारोपकार्यक्रमः सुचारु सम्पन्नः । कार्यक्रमे परिसरस्य निदेशकः

आचार्यः हंसधरझावर्यः आध्यक्ष्यम् अलङ्कृत्य शास्त्राणां संस्कृतस्य प्रचारप्रसार्थं मुस्तस्वाध्यायपीठस्य शैक्षिकविकासकेन्द्रेण कृतानां कार्याणाम् उल्लेखपुरस्सरं सर्वान् उदबोधयन् । मुक्तस्वाध्यायपीठस्य निदेशकः आचार्यः रत्नमिहनझावर्यः तथा संयुक्तनिदेशकः आचार्यः कू.वेङ्कटेशमूर्तिवर्यः च मुक्तस्वाध्यायपीठस्य विकासार्थं क्रियमाणानां कार्याणां मार्गदर्शनं कृतवन्तौ । कार्यक्रमे शैक्षिकविकासकेन्द्रस्य अध्यापकेषु सन्दीपः स्वागतं, अनन्तकृष्णः अनुभवकथनं, अरुणभट्टः धन्यवादं, रमेशचन्द्रबरमोला मञ्चसञ्चालनं च अकरोत् । सफलतया सम्पन्नायाः कार्यशालायाः समापनसत्रं शान्तिमन्त्रेण सुसम्पन्नम् ।

## कुलपतिभिस्सह मुक्तस्वाध्यायपीठस्य अध्यापकानां सामूहचित्रम्



# कार्यशालायाः चित्राणि



कुलपतिभिः कार्यशालायाः उद्घाटनम्



दीपप्रज्वालनेन उद्घाटनम् ।




प्रथमसत्रस्य चित्रम् ।



अध्ययनसामग्र्याः लोकार्पणम् ।



कुलपतिभिः कार्यकलापानां पर्यवेक्षणम्




कार्यशालायाः समारोपकार्यक्रमः ।

## कार्यशालायाः व्यवस्थापनार्थं रचिताः समितयः

के.सं.वि./शै.वि.के./का.आ./2023-24/ दिनाङ्कः : 07-12-2023

# केन्द्रीयसंस्कृतविश्वविद्यालयः
## मुक्तस्वाध्यायपीठम्
### शैक्षिकविकासकेन्द्रम् (रा. गा. परिसरः, शृङ्गेरी)

**कार्यालयीयः आदेशः**

सम्मान्यानां कुलपतीनाम् आध्यक्ष्ये 12-12-2023 तमे दिनाङ्के आयोजनीयायाः विकासपरिचिन्तनकार्यशालायाः, अभिनवपाठ्यक्रमेषु प्रविष्टानां सत्रारम्भकार्यक्रमस्य, तत्पश्चात् 15 तमदिनाङ्कं यावत् सङ्कल्पितकार्यक्रमाणां च स्वरूपचिन्तनव्यवस्थापनादीनां सम्पादनाय अधोनिर्दिष्टरीत्या समितयः आरचिताः।

| क्र. सं. | कार्याणि | समितिः |
|---|---|---|
| 1 | कार्यक्रमस्य वर्णरञ्जितामन्त्रणपत्रसज्जता (Preparation of banner) | डा. किरणभट्टः<br>श्री श्रीगणेशः<br>श्री नवनीतकृष्णः |
| 2 | You tube channel सज्जता, कार्यक्रमप्रसारः (चित्रीकरणम्, ध्वनिमुद्रणम्, live telecast) | श्री रविशङ्करः<br>श्री गोपालकृष्णः<br>सुश्रीः संयुक्ता |
| 3 | कार्यक्रमसज्जता (कार्यक्रमसमयसारिणी, स्वरूपम्, सूची, आवासः इत्यादिः) | डा. सन्दीपः दुबे<br>डा. अरुणभट्टः<br>डा. रमेशचन्द्रः |
| 4 | भोजनपानीयादिव्यवस्था | श्री अनन्तकृष्णः<br>डा. उमाकान्तः<br>श्री रविशङ्करः |
| 5 | प्रतिवेदन/वार्तासञ्चिकासज्जीकरणम् (प्रकृतशैक्षिकवर्षे प्रवृत्तानां शैक्षणिककार्यक्रमाणाम् इतरकार्यक्रमाणां च प्रतिवेदनम्, प्रकृतायोजनस्य प्रतिवेदनम्) | डा. जगदीशभट्टः<br>डा. मुरलीकृष्णः |
| 6 | पाठ्यक्रमानुसारेण प्रविष्टच्छात्रसङ्ख्यापूर्णविवरणम्, मु. स्वा. पीठस्य profile नवीकरणम् | श्री श्रीगणेशः<br>श्री नवनीतकृष्णः |

| | | |
|---|---|---|
| 7 | मु. स्वा. पीठस्य शैक्षिकविकासकेन्द्रस्य च संक्षिप्तपरिचयात्मिका चलच्चित्रप्रस्तुतिः, CIQA | डा. किरणभट्टः<br>श्री गोपालकृष्णः<br>श्री गणेशप्रसादः<br>श्री नवनीतकृष्णः |
| 8 | LMS सज्जता, जालपुटसज्जता | डा. अनिलकुमारः<br>श्री गोपालकृष्णः |
| 9 | ग्रन्थलोकार्पणसज्जता (दर्शनावतरणी) | श्री राहुलः<br>श्री मानवेन्द्रः<br>श्री अनन्तकृष्णः |
| 10 | ग्रन्थलोकार्पणसज्जता (नवोदितकविताप्रसूनानि) | डा. जगदीशभट्टः<br>डा. उमामहेश्वरः<br>श्री देवाङ्गः |
| 11 | ग्रन्थलोकार्पणसज्जता (नैतिकशिक्षणम्) | डा. किरणभट्टः<br>डा. राजेन्द्रभट्टः |
| 12 | पाठ्यक्रमानुसारेण वार्षिकशैक्षिकसमयसारिणीनिर्माणम् | तत्तत्पाठ्यक्रमसंयोजकाः,<br>पाठ्यसंयोजकाः अध्यापकाश्च |
| 13 | LMS मध्ये तत्तत् पाठ्येषु सम्बद्धच्छात्रयोजना | तत्तत्पाठ्यक्रमसंयोजकाः<br>अध्यापकाः |

सर्वे समितिसदस्याः कार्यतत्पराः सन्तः कार्यक्रमसाफल्याय प्रयतेरन्। यथासमयं प्रगतिं सूचयेयुः प्रतिवेदनं च समर्पयेयुः।

06-12-2023

(कृ. वेङ्कटेशमूर्तिः)
संयुक्तनिदेशकः
मुक्तस्वाध्यायपीठम्

प्रतिकृतिः -

1. सम्बद्धसदस्येभ्यः सूचनार्थम्
2. परिसरनिदेशकेभ्यः सादरं सूचनार्थम्
3. सञ्चिकाप्रतिकृतिः

## कार्यक्रमविवरणम् –

**केन्द्रीयसंस्कृतविश्वविद्यालयः**

**मुक्तस्वाध्यायपीठम्**

**शैक्षिकविकासकेन्द्रम् श्रृङ्गेरी**

**मुक्तस्वाध्यायपीठस्य विकासपरिचिन्तनकार्यशाला**

**उद्घाटनसत्रम् - 12-12-2023**

| | | |
|---|---|---|
| 9:30 | वैदिकमङ्गलाचरणम् | श्रीमान् अरुणः श्रीगणेशश्च |
| | लौकिकमङ्गलाचरणम् | श्रीमान् देवाङ्गभट्टः |
| 9:40 | स्वागतं प्रास्ताविकं च | आचार्यः रत्नमोहनझाः |
| 9:50 | शैक्षिकविकासकेन्द्रस्य कार्यशालायाश्च उद्घाटनम् | कुलपतिः अतिथयश्च |
| 10:00 | स्वाध्यायप्रबन्धनतन्त्रांशस्य(LMS) | |
| | परिवर्धितसंस्करणस्य लोकार्पणम् | |
| | परिचयः - श्रीमान् अनिलकुमारः | |
| | स्वाध्यायसामग्र्याः लोकार्पणम् | |

- दर्शनपरिचयः
- मनुष्यालयचन्द्रिका
- नैतिकशिक्षणम्

ग्रन्थलोकार्पणम्

- वार्तासञ्चिका

- नवोदितकविताप्रसूनानि

| | | |
|---|---|---|
| 10:15 | मुख्यातिथिभाषणम् | डा मनोजकुमारनागसम्पिगे |
| 10:25 | परिसरनिदेशकवक्तव्यम् | आचार्यः हंसधरझाः |
| 10:35 | अध्यक्षभाषणम् | आचार्यः श्रीनिवासवरखेडीवर्यः |
| 10:55 | अतिथिसत्कारः | |
| | धन्यवादज्ञापनम् | |
| 11:00 | शान्तिमन्त्रः | |

सञ्चालनम् – श्रीमान् कू वेङ्कटेशमूर्तिः

## सत्रारम्भकार्यक्रमः

| | | |
|---|---|---|
| **6:30** | **वैदिकमङ्गलाचरणम्** | **- अक्षयनितीनौ** |
| | **लौकिकमङ्गलाचरणम्** | **- लया शाजू** |
| **6:35** | **स्वागतं प्रास्ताविकं च** | **- आचार्यः रत्नमोहनः झाः** |
| **6:45** | **मुख्यातिथिभाषणम्** | **- प्रो अमी यू उपाध्याया** |
| **7:00** | **निदेशकवक्तव्यम्** | **- आचार्यः हंसधरझाः** |
| **7:10** | **अध्यक्षभाषणम्** | **- आचार्यः श्रीनिवासवरखेडी** |
| **7:30** | **धन्यवादज्ञापनम्, शान्तिमन्त्रः** | |